शास्त्री तृतीय खण्डस्य कृते (साहित्यम्)
अलङ्कार विवेचनम्
सा० द० दशम परिच्छेदः

सङ्करालङ्कार विवेचनम्

'अङ्गाङ्गित्वेऽलङ्कृतीनां तद्वदेकाश्रयस्थितौ ।
सन्दिग्धत्वे च भवति सङ्करस्त्रिविधः पुनः ॥'

(1) यस्मिन् पद्ये प्रधानाप्रधानभावेन अलङ्काराणां स्थितिर्भवति तत्र अङ्गाङ्गिभाव सङ्करः अलङ्कारो भवति ।

(2) यस्मिन् पद्ये वाक्ये वा एकस्मिन्नेव आश्रये अनेकयोः द्वयोरथवा अलङ्काराणां अवस्थितिर्भवति तत्र एकाश्रयानुप्रवेश सङ्कराऽलङ्कारो भवति ।

(3) यस्मिन् पद्ये वाक्ये वा अयमलङ्कारो वा अन्योऽलङ्कारो भवति इति तत्र निर्णायक प्रमाणाभावेन सन्देहो भवति तत्र सन्देह सङ्करालङ्कारः भवति ।
त्रिविधेऽपि अस्मिन् सङ्करे 'नीर क्षीर न्यायेन' अलङ्काराणां तादात्म्येन प्रतीतिर्न भवतीति संसृष्टितो वैलक्षण्यम् ।

तत्र अङ्गाङ्गिभावो यथा —
'आकृष्टिवेगविगलद्भुजगेन्द्रभोगनिर्मोकपट्टपरिवेष्टनयाम्बुराशेः ।
मन्थव्यथाव्युपशमार्थमिवाशु यस्य मन्दाकिनी चिरमवेष्टत पादमूले ॥'
अत्र निर्मोकपट्टापह्नवेन मन्दाकिन्या आरोप इति अपह्नुतिः । सा च मन्दाकिन्या वस्तुवृत्तेन पादमूलवेष्टनं चरणमूलवेष्टनमिति श्लेषमुत्थापयतीति तस्याङ्गम् । श्लेषश्च पादमूलवेष्टनमेव चरणमूलवेष्टनमित्यतिशयोक्तेरङ्गम् । अतिशयोक्तिश्च 'मन्थव्यथाव्युपशमार्थमिव' इत्युत्प्रेक्षाया अङ्गम् । यथा वा —
'अनुरागवती सन्ध्या दिवसस्तत्पुरःसरः ।
अहो दैवगतिश्चित्रा तथापि न समागमः ॥'
अत्र लिङ्गसादृश्य प्रयुक्ता समासोक्तिः विशेषोक्तेरङ्गम् ।

सन्देह सङ्करो यथा —
'इदमाभाति गगने भिन्दानं सन्ततं तमः ।
अमन्दनयनानन्दकरं मण्डलमैन्दवम् ॥'
अत्र किं मुखस्य चन्द्रतयाऽध्यवसानादतिशयोक्तिः, उत इदमिति मुखं निर्दिश्य चन्द्रत्वारोपाद्रूपकम् । अथवा इदमिति मुखस्य चन्द्रमण्डलस्य च द्वयोरपि प्रकृतयोरेकधर्माभिसम्बन्धात् तुल्ययोगिता, आहोस्वित् चन्द्रस्याप्रकृतत्वाद् दीपकम्, किं वा विशेषण साम्याद् अप्रस्तुतस्य मुखस्य गम्यत्वात् समासोक्तिः, यद्वा अप्रस्तुत प्रशंसा यद्वा मन्मथोद्दीपनः कालः स्वकार्यभूत-चन्द्र-पर्यायमुखेन वर्णित इति पर्यायोक्तिरिति बहूनामलङ्काराणां सन्देहात् सन्देह सङ्करः ।

एकाश्रयानुप्रवेश सङ्करो यथा —
'संसारध्वान्तविध्वंस हंस कंसनिषूदन ।' इति
अत्र छेकानुप्रासयोरेकाश्रयानुप्रवेशात् सङ्करः ।
यथा वा — 'कुरवका रवकारणतां ययुः' ।
इत्र 'रवका' 'रवका' इत्येक 'वकार वकार' इत्यपरम्
इति यमकयोरेकाश्रयानुप्रवेश रूप सङ्करालङ्कारः इति

उपेन्द्र झा
7/8/20
प्राध्या० प्रा० साहित्य
रा० उ० सं० महाविद्यालय
फुलपरास, मधुबनी

शास्त्री द्वितीय खण्डस्य कृते (साहित्यम्)
वेणीसंहार नाम नाटकस्य श्लोक व्याख्या

"युष्मच्छासनलङ्घनांहसि मया मग्नेन नाम स्थितं
प्राप्ता नाम विगर्हणा स्थितिमतां मध्येऽनुजानामपि।
क्रोधोल्लासितशोणितारुण गदस्योच्छिन्दतः कौरवा-
नद्यैकं दिवसं ममासि न गुरुर्नाहं विधेयस्तव ॥"

प्रस्तुतोऽयं श्लोकः महाकवि भट्टनारायणेन विनिर्मितः वीररस प्रधानः वेणीसंहार नाम नाटकस्य प्रथमाङ्कात् उद्धृतोऽस्ति। श्लोकेऽस्मिन् कौरवैः सह सन्धि प्रस्तावेन कुपितो भीमः सहदेवं कथयति यद् ज्येष्ठ भ्रातरं (युधिष्ठिरं) प्रति एतत् कथय - यदेकं दिनं भवान् मम ज्येष्ठ भ्राता नास्ति अहमपि तेऽनुजश्च नास्मि, अर्थात् अद्याहं तवाज्ञा पालने असमर्थोऽस्मि।

युष्मच्छासनलङ्घनांहसि मया मग्नेन स्थितं नाम, स्थितिमताम् अनुजानाम् अपि मध्ये विगर्हणा प्राप्ता नाम, क्रोधोल्लासित शोणितारुण गदस्य कौरवान् उच्छिन्दतः मम अद्य एकं दिवसं त्वं गुरुः न असि, अहं च तव विधेयः नास्मि।

युष्मच्छासनलङ्घनांहसि = युष्माकं यत् शासनं युष्मच्छासनं, तस्य लङ्घनं तदेवांहस्तस्मिन् = भवत आज्ञा लङ्घन महापातके। मया = भीमसेनेन मग्नेन = निमग्नेन स्थितं नाम = स्थितं विद्यमानेति। स्थितिमताम् = स्थितिः = मर्यादा अस्ति येषां ते तेषाम् = आज्ञापालनरूप मर्यादावताम्। अनुजानाम् = लघुभ्रातॄणामपि, मध्ये = अन्तरे। विगर्हणा = निन्दा। प्राप्ता नाम = प्राप्तेति स्वीकरणे। क्रोधोल्लासित - शोणितारुणगदस्य - क्रोधेन = कोपेन उल्लासिता = प्रहर्तुमुद्यता शोणितेन = रुधिरेण, अरुणा = रक्तवर्णा गदा यस्य सः तस्य, कौरवान् = धार्तराष्ट्रान्, उच्छिन्दतः = उन्मूलयतः, मम = भीमस्य। अद्य = अस्मिन् दिने, एकं दिवसम् = एकं दिनं यावत्, त्वम् = भवान् युधिष्ठिरः, गुरुः = श्रेष्ठः न असि = नहि भवसि। अहं = भीमसेनः च तव = ते विधेयः = विधातुं योग्यः = आदेशपालनः न भवामीति। अत्र शार्दूल विक्रीडितं वृत्तम्। तल्लक्षणं यथा -
'सूर्याश्वैर्मसजास्ततः सगुरवः शार्दूलविक्रीडितम्'

इति

उपेन्द्र झा
5/8/20
शास्त्री द्वि० साहित्य
रा० उ० सं० महाविद्यालय
फुलेरा, जयपुर

शास्त्री प्रथम खण्डस्य कृते (साहित्यम्)
महाकवि कालिदासस्य अभिज्ञान शाकुन्तले मौलिकोद्भावनानां मूलकथानके परिवर्तनस्य विवेचनम्।

---

यतो हि: कविनायको हेतुकमार्तं गृह्णाति यः 'सत्यं शिवं सुन्दरम्' इत्येतस्य समुपासको भवति। इत्येतदनुसरतः महाकवि कालिदासेन अभिज्ञानशाकुन्तलस्य कथानकं महाभारतात् एव गृहीतम्। अभिज्ञानशाकुन्तलं काव्यपुरुषस्य कविता वनितायाश्च शिरोभूषणायितं तिष्ठति —

'काव्येषु नाटकं रम्यं तत्र रम्या शकुन्तला।' इति

अभिज्ञान शाकुन्तले औचित्य निर्वाहार्थं मूल कथानके कृतानां परिवर्तनानां कानिचिदुदाहरणानि उपस्थाप्यन्ते —

(1) मूलकथानके मृगयासक्तो राजा दुष्यन्तः सैन्यैः सह महर्षि कण्वस्याश्रम समीपमागतः।
अभिज्ञान शाकुन्तले सैनिकाः पश्चादेव स्थापिताः। अग्रे-अग्रे सारथिना सह द्वितीयो राजा आश्रममागतः। तत्र च आतिथ्याय कण्व शिष्यैः वैखानसैः आमन्त्रितः सन् द्वारे सारथिं परित्यज्य आश्रमं प्रविष्टः।

(2) मूलकथायां एकाकी आश्रमं प्रविष्टस्य राज्ञः महर्षि कण्वस्यानुपस्थितौ प्रथमं शकुन्तला दर्शनं जातम्। उभयोः वार्तालापं वार्तादिकं जातम्।
अभिज्ञानशाकुन्तले आश्रमं प्रविष्टो राजा वृक्षसेचनकं कुर्वन्तीं शकुन्तलां ददर्श। किन्तु तयोः सम्मिलनं तदा जातं यदा शकुन्तला केनचित् दुष्टभ्रमरेण परिबाधिता जाता तथा —
"कः परित्रायेत्" इति ... नामतेन दुष्यन्तस्य करेणाभिभूयमानां शकुन्तलया आर्तनादं श्रुत्वा — "कः आर्तां परित्रायते?" उत्तरमुक्तम्। यतोहि राजरक्षितानि तपोवनानीति।

(3) मूलकथानके काचित् भूते काले शकुन्तला राज्ञः आतिथ्यं करोति। वार्ता प्रवृत्ते च विश्वामित्रः कोऽपि वर्णयति राज्ञः प्रेमनिवेदनं च करोति —
अभिज्ञान शाकुन्तले अनुसूयया सखीभ्यां प्रियंवदया च सह शकुन्तला आश्रमे गते राजा अनुसूयया सह वार्तालापे प्रविष्टस्य राज्ञः विषये पृष्टा सखी सम्बन्धं वर्णयति।

(4) मूलकथानके राजा विवाहिता शकुन्तला उत्पादितवती तथा पुत्रोऽपि तेनाऽपि षड्वर्षानन्तरं (विवाहानन्तरं वर्धमानं पुत्रं) कण्वेन पतिगृहं प्रेषिता।
अभिज्ञान शाकुन्तले प्रत्याख्याने निवृत्ते आकाशवाण्या ज्ञात पश्चात् पुत्रोत्पत्ति पूर्वमेव शकुन्तला पतिगृहं प्रेषिता।

(5) मूलकथानुसारं षड्वर्षदेशीयेन पुत्रेण सह शकुन्तला पतिगृहं प्रेषिता। प्रेमवशादपि राजा तां न स्वीकृतवान् तदा आकाशवाण्यानन्तरं स्वीकारोति।
अभिज्ञान शाकुन्तलानुसारं गर्भिण्येव शकुन्तला दुष्यन्तं प्रेषिता। दुर्वासा शापवशात् विस्मृत विवाह वृत्तान्तेन राजा तां तिरस्कृता चेति। पुनः अङ्गुलीयक दर्शनं राजा प्राप्तेऽभिज्ञाने स्मृतं शकुन्तला वृत्तान्तः। तामन्विष्यन् मारीचाश्रमे तां प्राप्नोति।

एवं महाकविना कथानके किञ्चित्-किञ्चित् युक्तियुक्तं परिवर्तनं कृतमस्ति। मूलकथानके दुर्वासा शापप्रसङ्ग कथा, अङ्गुलीयक घटना, विदूषकस्योपस्थिति कण्वस्य द्वारा कृतमाङ्गलिकमपि नास्ति।
एवं मूलकथानके परिवर्तनैः स्वकीयाभिः मौलिकताभिः कल्पनाभिश्च औचित्यं सम्पाद्य एव तेन कवीश्वरेण अभिज्ञानशाकुन्तलस्य कथानकस्य चमत्कारो विहितः। अतएव नाटकं संस्कृत साहित्य शिरोमणि जातमिति।

उपेन्द्र झा
7/9/20
शास्त्री प्र० साहित्य
... उ० सं० महाविद्यालय
सुपौल, बिहार